# Shri Lakshmi Hridaya Stotram

# શ્રીલક્ષ્મીહૃદયસ્તોત્રમ્

## Document Information

Text title : lakShmIhRidaya stotram

File name : laxmiihridaya.itx

Category : hRidaya, devii, lakShmI, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, N.Balasubramanian, PSA Easwaran

Translated by : N.Balasubramanian

Description-comments : should be used with nArAyaNahRidayam

Latest update : November 06, 2004, March 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2023

*sanskritdocuments.org*

# Shri Lakshmi Hridaya Stotram

# શ્રીલક્ષ્મીહૃદયસ્તોત્રમ્

આદ્યાદિ શ્રીમહાલક્ષ્મીહૃદયસ્તોત્રમ્ ।

। શ્રીગણેશાય નમઃ ।

। હરિઃ ૐ ।

INTRODUCTION:- The following abbreviations are used in the comments that follow. 1- Narayana Hridayam - NH. (2) Laxmi Hridayam - LH (3) Vishnu Sahasranama with the commentary of Shri Shankaracharya - VS. (4) Bhagavad Gita - BG. (5) Shrimad Bhagavatham - BH (6) Lalitha Sahasranamam - LS. (7) Vivekachudamani of Shri Shankaracharya - VC. (8) Katha Upanishad - KU. (9) Mundaka Upanishad - MU

LH:- Laxmi Hridayam stotram is unique in that it is coupled with another stotram Narayana Hridayam to form a pair. They are found in the Atharva Rahasyam. They were given out by sage Bhargava.

The final part of NH says that NH is to be recited first, to be followed by the recital of Laxmi Hridayam and again the recital of theNH. This is not to be recited separately as a single piece.

This is to stress the fact that Lord Narayana and Laxmi are indeed one though spoken of as two different deities.

NH and LH belong to the category of stotram સ્તોત્રમ્ .

The appellation stotram, stuti and stavam all describe a hymn only. સ્તવઃ સ્તોત્રં નુતિઃ સ્તુતિઃ । says Amara, the Sanskrit lexicon. They all narrate the qualities of a deity. ગુણસઙ્કીર્તનમ્ is stotram, says Shri Shankaracharya in his commentary to Vishnu Sahasranama.

NARAYANA HRIDAYAM AND LAXMI HRIDAYAM:- Narayana Hridayam (NH) and Laxmi Hridayam (LH) form a pair of very valuable and sacred hymns. NH is the

shorter one. It consists of only 37 verses. LH is longer and consists of 108 verses. The word (હૃદયમ્) hridayam is popularly taken to mean the heart. The word also is used to mean secret, true or divine knowledge. Being hymns found in the Veda the Narayana Hridayam and Laxmi Hridayam Stotras are highly efficacious. They also contain recondite vedantic truths which may be found in the upanishads, puranas, Bhagavad Gita etc. These truths are also to be seen in other stotras and in the hymns of later acharyas. લક્ષ્મીહૃદયકે સ્તોત્રે સર્વમન્યત્ પ્રકાશિતમ્ । (NH - 33). So, to describe them as hridayam is very apt. They are, therefore, very precious. For these reasons they are considered very sacred and therefore secret - not to be easily given out. ગોપ્યમેતત્સદા કુર્યાત્ ન સર્વત્ર પ્રકાશયેત્। says Narayana Hridayam (34) in its later part. Because of this restriction these stotras were handed down from a worthy guru to deserving disciples only. They were not freely available like Vishnu Sahasranamam.

Only some noteworthy features of this LH stotram could be mentioned in this brief introduction. The reader is requested to read the comments given to the NH (that is available in this site under the headimg VISHNU). to get a complete picture of the two stotras that are linked together.

LH:- The first fifteen verses praise Laxmi Devi and offer salutations to Her. Since She is the mother of all creation, She can bless the devotee with all material wealth. But, She is inseparable from the Lord. This is said by saying that one is within the other.

નારાયણસ્ય હૃદયે ભવતી યથાऽऽસ્તે,
    નારાયણોऽપિ તવ હૃત્કમલે તથાસ્તે ।
નારાયણસ્ત્વમપિ નિત્યવિભૂ તથૈવ,
    તૌ તિષ્ઠતાં મમાપિ દયાન્વિતૌ શ્રીઃ ॥

She is with the Lord at all places.

યથા વૈકુણ્ઠનગરે યથા વૈ ક્ષીરસાગરે ।

તથા મદ્ભવને તિષ્ઠ સ્થિરં વિષ્ણુના સહ ॥

યોગિનાં હૃદયે નિત્યં યથા તિષ્ઠસિ વિષ્ણુના ।
તથા મદ્ભવને તિષ્ઠ  સ્થિરં શ્રીવિષ્ણુના સહ ॥

She is also the Self seated in the heart of all beings  She is stated
to be સર્વભૂતાન્તરસ્થા in the LH. So is not different from
the Lord who also says He is the Self seated in the heart of all beings.
અહમાત્મા ગુડાકેશ સર્વભૂતાશયસ્થિતઃ । BG(10-20).
Thus, it is evident that She is identical with  Narayana and can confer
all that one may seek including liberation or mokSha.  This is said in
the LH as ગત્યૈ નમોઽસ્તુ વરસદ્ગતિદાયકાયૈ।
Further, it is to be noted that if one's accumulated
karmas stand in the way of one progressing towards liberation
in the form of the "writing on the head" (લલાટલિખિતા રેખા) by
of the creator Brahma, She, being the creator of every thing with name
and form including Brahma, can alter the same and help in his progress.

લિલેખ નિટિલે વિધિર્મમ લિપિં વિસૃજ્યાન્તરં
   ત્વયા વિલિખિતવ્યમેતદિતિ તત્ફલપ્રાપ્તયે ।
તદન્તિકફલસ્ફુટં કમલવાસિનિ શ્રીરિમાં
   સમર્પય સમુદ્રિકાં સકલભાગ્યસંસૂચિકામ્ ॥ (LH)

Here, the word "creator" does not mean She has created something out of
nothing, but only means She has evolved as everything. She has become
Brahma the creator and Vishnu the protector also.
સૃષ્ટિકર્ત્રી બ્રહ્મરૂપા ગોપ્ત્રી ગોવિન્દરૂપિણી। LS(114)
Shri Vedanta Desika uses this idea in his Shri Hayagriva Stotram (verse 20).

વિલુપ્તમૂર્ધન્યલિપિક્રમાણાં સુરેન્દ્રચૂડાપદલાલિતાનામ્ ।
ત્વદઙ્ઘ્રિરાજીવરજઃકણાનાં ભૂયાન્ પ્રસદો મયિ નાથ ભૂયાત્ ॥

The great acharya prays to the Lord that the pollen dust of His Lotus
Feet should fall on his head so as to remove the letters written by
Brahma at his birth. He indicates that even gods like Indra salute His
feet with the same idea; that is; the dust of Lord's feet should fall

on their heads and alter their fate as decreed by the scribbling of Brahma on their head. Lord Krishna gives the assurance to Arjuna in BG(18-52) that with his mind firmly fixed on Him he will cross over all difficulties on his spiritual path.

મચ્ચિત્તઃ સર્વદુર્ગાણિ મત્પ્રસાદાત્તરિષ્યસિ ।

The LH repeatedly asks for the fulfilment of the first two of the four goals (viz.) wealth and enjoyment of pleasures of life got from wealth. But wealth in the hands of one without discretion can have disastrous consequences. It can lead one away from the spiritual path and to his downfall. Our scriptures warn one of this and say that one who hoards wealth without sharing with the needy is indeed a thief and deserves punishment. BG(VII-XIV-89)

યાવદ્ભ્રિયતે જઠરં તાવત્ સ્વત્ત્વં હિ દેહિનામ્ ।
અધિકં યોઽભિમન્યેત સ સ્તેનો દણ્ડમર્હતિ ॥

Keeping this injunction in mind, the devotee asks for wisdom before seeking wealth and also asks Her to bless the heart with compassion to enable him to share the wealth liberally with others.

વિજ્ઞાનવૃદ્ધિં હૃદયે કુરુ શ્રીઃ સૌભાગ્યવૃદ્ધિં હૃદયે કુરુ શ્રીઃ ।
દયાસુવૃષ્ટિં કુરુતાં મયિ શ્રીઃ સુવર્ણવૃષ્ટિં કુરુ મે કરે શ્રીઃ ॥

The end portion contains some significant requests. We saw that the LH repeatedly asks for good things of life, wisdom etc. But as stated earlier whatever is got by our own efforts or karma will be finite and so will not last for long. Our life will continue to have fluctuations. The better and wiser alternative is to make the Lord stay in our hearts for ever by having steadfast devotion to Him . Then all auspicious things will be with us for ever. So, the LH asks for શ્રીશાઙ્ઘ્રિભક્તિઃ । or devotion to the feet of the Lord first.

શ્રીશાઙ્ઘ્રિભક્તિં હરિદાસ્યદાસ્યં પ્રસન્નમન્ત્રાર્થદૃઢૈકનિષ્ઠામ્ ।
ગુરોઃ સ્મૃતિં નિર્મલબોધબુદ્ધિં પ્રદેહિ માતઃ પરમં પદં શ્રીઃ ॥

The saint Kulasekhara also asked - not for the three purushartas -

dharma, artha and kama. He says that let events, good or bad, happen according to karmas he had done. He prays to the Lord to grant him unwavering devotion to His lotus like feet in this and in future births. (Mukundamala).

નાસ્થા ધર્મે ન વસુનિચયે નૈવ કામોપભોગે
 યદ્યદ્ભવ્યં ભવતુ ભગવન્ પૂર્વકર્માનુરૂપમ્ ।
એતત્પ્રાર્થ્યં મમ બહુમતં જન્મજન્માન્તરેઽપિ
 ત્વત્પાદામ્ભોરુહયુગગતા નિશ્ચલા ભક્તિરસ્તુ ॥

The Vishnu Purana says the same truth by stating that those who may be bereft of worldly possesions and so termed "poor" in the worldly sense are really rich if their hearts have the wealth of love for Shri Hari. The reason is that Shri Hari also stays in their hearts being tied with cords of love.

સકલભુવનમધ્યે નિર્ધનાસ્તેઽપિ ધન્યા
 નિવસતિ હૃદિ યેષાં શ્રીહરેર્ભક્તિરેકા ।
હરિરપિ નિજલોકં સર્વથા તં વિહાય
 પ્રવિશતિ હૃદિ તેષાં ભક્તિસૂત્રોપનદ્ધઃ ॥

So, the prayer is to grant before other things, devotion to the feet of the Lord.

Another prayer is to being a servant to the servants of Hari. Our scriptures repeatedly stress the importance of service to the devotees of the Lord.

The sage Naradha says in his Bhakti Sutra (No: 39-42) that the company of the devotees of the Lord is difficult to obtain. It never fails to produce beneficial results. It is got by the grace of God only. Thers is no difference between the Lord and His devotees. So, one should strive to get it.

મહત્સઙ્ગસ્તુ દુર્લભોઽગમ્યોઽમોઘશ્ચ ।
લભ્યતેઽપિ તત્કૃપયૈવ । તસ્મિંસ્તત્જને ભેદાભાવાત્ ।
તદેવ સાધ્યતાં, તદેવ સાધ્યતામ્ ॥

In Shrimad Bhagavatam we have the story of Lord's
incarnation as Rishaba Deva. Before renouncing His kingdom and taking
to the forests, He talks to His sons about the value of human life
and how they should work for liberation. Though Rishaba Deva says
He is an incarnation Himself, He advises His sons, not to surrender
to Him, but to seek the company of devotees and serve them saying it
is the doorway to liberation. મહત્સેવાં દ્વારમાહુઃ વિમુક્તેઃ ।
Coming from the mouth of the Lord, as an incarnation, it shows the
immense value of service to the devotees of the Lord. The company of
the devotees removes the impurities in the mind, brings calmness to
the mind. More importantly it instils faith in the statements of the
scriptures and acharyas known as shraddha. શ્રદ્ધા।. Only one who
is keenly interested, has controlled his senses and has shraddha can
gain knowledge, says Krishna. BG(4-39). શ્રદ્ધાવાન્ લભતે જ્ઞાનં
તત્પરઃ સંયતેન્દ્રિયઃ । One gets the qualifications required for
acquiring vedantic knowledge.
Shri Shankaracharya glorifies the association of the devotees in his
Sivanandhalahari by saying it as great as the company of the Lord Himself.
સામીપ્યં શિવભક્તિ-ધુર્ય-જનતા-સાઙ્ગત્ય સમ્ભાષણે।
Once the mind is clear of impurities like greed, anger etc., and also
imbibed noble qualities from the association of the devotees,
God sends him a suitable guru. The vedatic wisdom has necessarily to
be obtained from the guru's mouth.
તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્ સમિત્પાણિઃ શ્રોત્રિયં
બ્રહ્મનિષ્ઠમ્ । MU(1-2-12). Krishna also advised Arjuna to serve
men of wisdom and seek knowledge. BG(4-34).
તદ્વિદ્ધિ પ્રણિપાતેન પરિપ્રશ્નેન સેવયા ।
ઉપદેક્ષ્યન્તિ તે જ્ઞાનં જ્ઞાનિનસ્તત્ત્વદર્શિનઃ ॥
The guru's teachings remove the doubts that may be clouding
the student's mind and his intellect becomes clear, said here as
નિર્મલબોધબુદ્ધિઃ । The upanishad says that a person endowed
with discriminating intellect, has controlled his mind and has got

concentration, reaches the end of the very very long road, that is known as samsara and reaches the supreme goal and becomes free from all bondages. This is known as liberation and said herein as પરમં પદમ્ । highest abode of Vishnu or Brahman.

વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહવાન્નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ KU(1-3-9)

The word પરમં પદમ્ । mentioned here is a well known name of the Lord VS(732). પદમનુત્તમમ્ એવમ્ પદ્યતે ગમ્યતે મુમુક્ષુભિરિતિ પદમ્ । યસ્માદુત્કૃષ્ટં નાસ્તિ તદનુત્તમમ્ । It is the higest place or goal that is attained by the seekers of liberation. "Attaining" does not imply going to some far of place like Vaikunta or Kailasa. Liberation means understanding ones own true divine nature and abiding in it. This is said here as વિષ્ણોઃ પરમં પદમ્ । or the highest place of all-pervading Brahman, of the supreme Self.

CONCLUSION. The end portion says the benefits one may get by reciting the LH. It assures that the Goddess Laxmi will fulfil the desires of Her devotee and look after him like Her son. There is a story in the Mahabharata to illustrate this. Balarama, the elder brother of Krishna, planned to get his sister Subhadra married to Duryodhana. In the mean time Arjuna happened to look at her and was captivated by her bewitching beauty. His mind was set on marrying her and wanted to talk about his wish to his friend Krishna. But he was worried at the same time that, if Krishna agreed to help him and took steps, it may create a rift between the brothers Krishna and Balarama. He was at his wit's end and wanted a way out the predicament. He prayed to sage Vyasa who promptly appeared before him. He put his problem before the sage and requested his help. The sage taught him LH and asked him to recite the stotram in the prescence of a lamp lighted with ghee and assured him that he will succeed in his endeavour. Arjuna followed the sage's advice, recited the LH with faith and married Subhadra in the end.

It will be evident from what is said here that both the NH and LH are valuable hymns and like veritable mines of precious gems. An interested reader will be

able to find more gems if he digs deep into them. The greater benefit will be, that by reciting them regularly, one will develop devotion to Divine Couple, Lord Narayana and Goddess Laksmi, and reap their abundant grace. Now follows the stotram LAXMI HRIDAYAM.

॥ ૐ તત્સત્ ॥

# શ્રીલક્ષ્મીહૃદયસ્તોત્રમ્

## અથ સ્તોત્રમ્ ।

અસ્ય શ્રી આદ્યાદિ શ્રીમહાલક્ષ્મી-હૃદય-સ્તોત્ર-મહામન્ત્રસ્ય ભાર્ગવ ઋષિઃ(શિરસિ),
અનુષ્ટુભાદિ નાનાછન્દાંસિ (મુખે), આદ્યાદિ-શ્રીમહાલક્ષ્મી સહિત નારાયણો દેવતા (હૃદયે) ॥

। ૐ બીજં, હ્રીં શક્તિઃ, ઐં કીલકમ્ ।
આદ્યાદિ-શ્રીમહાલક્ષ્મી-પ્રસાદસિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

ઓમ્ ॥ “આદ્યાદિ-શ્રીમહાલક્ષ્મી દેવતયૈ નમઃ” હૃદયે, “શ્રીં બીજાયૈ નમઃ” ગુહ્યે,
“હ્રીં શક્ત્યૈ નમઃ” પાદયોઃ, “ઐં બલાયૈ નમઃ” મૂર્ધાદિ-પાદ-પર્યન્તં વિન્યસેત્ ॥

ઓમ્ શ્રીં હ્રીં ઐં કરતલ-કરપાર્શ્વયોઃ, શ્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ,
હ્રીં તર્જનીભ્યાં નમઃ, ઐં મધ્યમાભ્યાં નમઃ, શ્રીં અનામિકાભ્યાં નમઃ,
હ્રીં કનિષ્ઠિકાભ્યાં નમઃ, ઐં કરતલ કરપૃષ્ઠાભ્યાં નમઃ ॥

ૐ હૃદયાય નમઃ, હ્રીં શિરસે સ્વાહા, ઐં શિખાયૈ વષટ્,
શ્રીં કવચાય હુમ્, હ્રીં નેત્રાભ્યાં વૌષટ્, ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

॥ અથ ધ્યાનમ્ ॥

હસ્તદ્વયેન કમલે ધારયન્તીં સ્વલીલયા ॥

હાર-નૂપુર-સંયુક્તાં મહાલક્ષ્મીં વિચિન્તયેત્ ॥

કૌશેય-પીતવસનામરવિન્દનેત્રામ્
પદ્મદ્વયાભય-વરોદ્યત-પદ્મહસ્તામ્ ।
ઉદ્યચ્છતાર્ક-સદૃશાં પરમાઙ્ક-સંસ્થાં
ધ્યાયેત્ વિધીશનત-પાદયુગાં જનિત્રીમ્ ॥

॥ શ્રીલક્ષ્મી-કમલધારિણ્યૈ સિંહવાહિન્યૈ સ્વાહા ॥

પીતવસ્ત્રાં સુવર્ણાઙ્ગીં પદ્મહસ્ત-દ્વયાન્વિતામ્ ।
લક્ષ્મીં ધ્યાત્વેતિ મન્ત્રેણ સ ભવેત્ પૃથિવીપતિઃ ॥

માતુલઙ્ગ-ગદાખેટે પાણૌ પાત્રઞ્ચ બિભ્રતી ।
વાગલિઙ્ગઞ્ચ માનઞ્ચ બિભ્રતી નૃપમૂર્ધનિ ॥

। ૐ શ્રીં હ્રીં ઐમ્ ।

વન્દે લક્ષ્મીં પરશિવમયીં શુદ્ધજામ્બૂનદાભાં
તેજોરૂપાં કનક-વસનાં સર્વભૂષોજ્જ્વલાઙ્ગીમ્ ।
બીજાપૂરં કનક-કલશં હેમપદ્મં દધાનામ્
આદ્યાં શક્તિં સકલજનનીં વિષ્ણુ-વામાઙ્કસંસ્થામ્ ॥ ૧॥

શ્રીમત્સૌભાગ્યજનનીં સ્તૌમિ લક્ષ્મીં સનાતનીમ્ ।
સર્વકામ-ફલાવાપ્તિ-સાધનૈક-સુખાવહામ્ ॥ ૨॥

સ્મરામિ નિત્યં દેવેશિ ત્વયા પ્રેરિતમાનસઃ ।
ત્વદાજ્ઞાં શિરસા ધૃત્વા ભજામિ પરમેશ્વરીમ્ ॥ ૩॥

સમસ્ત-સમ્પત્સુખદાં મહાશ્રિયં
સમસ્ત-કલ્યાણકરીં મહાશ્રિયમ્ ।
સમસ્ત-સૌભાગ્યકરીં મહાશ્રિયં
ભજામ્યહં જ્ઞાનકરીં મહાશ્રિયમ્ ॥ ૪॥

વિજ્ઞાનસમ્પત્સુખદાં મહાશ્રિયં
વિચિત્ર-વાગ્ભૂતિકરીં મનોહરામ્ ।
અનન્ત-સૌભાગ્ય-સુખપ્રદાયિનીં
નમામ્યહં ભૂતિકરીં હરિપ્રિયામ્ ॥ ૫॥

સમસ્ત-ભૂતાન્તરસંસ્થિતા ત્વં
સમસ્ત-ભક્તેશ્વરિ વિશ્વરૂપે ।
તન્નાસ્તિ યત્ત્વદ્વ્યતિરિક્તવસ્તુ
ત્વત્પાદપદ્મં પ્રણમામ્યહં શ્રીઃ ॥ ૬॥

દારિદ્ર્ય-દુઃખૌઘ-તમોઽપહન્ત્રિ ત્વત્-પાદપદ્મં મયિ સન્નિધત્સ્વ ।
દીનાર્તિ-વિચ્છેદન-હેતુભૂતૈઃ કૃપાકટાક્ષૈરભિષિઞ્ચ માં શ્રીઃ ॥ ૭॥

વિષ્ણુ-સ્તુતિપરાં લક્ષ્મીં સ્વર્ણવર્ણાં સ્તુતિ-પ્રિયામ્ ।
વરદાભયદાં દેવીં વન્દે ત્વાં કમલેક્ષણે ॥ ૮॥

અમ્બ પ્રસીદ કરુણા-પરિપૂર્ણ-દૃષ્ટ્યા

માં ત્વત્કૃપાદ્રવિણગેહમિમં કુરુષ્વ ।
આલોકય પ્રણત-હૃદ્ગત-શોકહન્ત્રિ
ત્વત્પાદ-પદ્મયુગલં પ્રણમામ્યહં શ્રીઃ ॥ ૯॥

શાન્ત્યૈ નમોઽસ્તુ શરણાગત-રક્ષણાયૈ
    કાન્ત્યૈ નમોઽસ્તુ કમનીય-ગુણાશ્રયાયૈ ।
ક્ષાન્ત્યૈ નમોઽસ્તુ દુરિતક્ષય-કારણાયૈ
    ધાત્ર્યૈ નમોઽસ્તુ ધન-ધાન્ય-સમૃદ્ધિદાયૈ ॥ ૧૦॥

શક્ત્યૈ નમોઽસ્તુ શશિશેખર-સંસ્થિતાયૈ
    રત્યૈ નમોઽસ્તુ રજનીકર-સોદરાયૈ ।
ભક્ત્યૈ નમોઽસ્તુ ભવસાગર-તારકાયૈ
    મત્યૈ નમોઽસ્તુ મધુસૂદન-વલ્લભાયૈ ॥ ૧૧॥

લક્ષ્મ્યૈ નમોઽસ્તુ શુભ-લક્ષણ-લક્ષિતાયૈ
    સિદ્ધ્યૈ નમોઽસ્તુ સુર-સિદ્ધ-સુપૂજિતાયૈ ।
ધૃત્યૈ નમોઽસ્તુ મમ દુર્ગતિ-ભઞ્જનાયૈ
    ગત્યૈ નમોઽસ્તુ વરસદ્ગતિ-દાયકાયૈ ॥ ૧૨॥

દેવ્યૈ નમોઽસ્તુ દિવિ દેવગણાર્ચિતાયૈ
    ભૂત્યૈ નમોઽસ્તુ ભુવનાર્તિ-વિનાશનાયૈ ।
શાન્ત્યૈ નમોઽસ્તુ ધરણીધર-વલ્લભાયૈ
    પુષ્ટ્યૈ નમોઽસ્તુ પુરુષોત્તમ-વલ્લભાયૈ ॥ ૧૩॥

સુતીવ્ર-દારિદ્ર્ય-તમોઽપહન્ત્ર્યૈ નમોઽસ્તુ તે સર્વ-ભયાપહન્ત્ર્યૈ ।
શ્રીવિષ્ણુ-વક્ષઃસ્થલ-સંસ્થિતાયૈ નમો નમઃ સર્વ-વિભૂતિ-દાયૈ ॥ ૧૪॥

જયતુ જયતુ લક્ષ્મીઃ લક્ષણાલઙ્કૃતાઙ્ગી
    જયતુ જયતુ પદ્મા પદ્મસદ્માભિવન્દ્યા ।
જયતુ જયતુ વિદ્યા વિષ્ણુ-વામાઙ્ક-સંસ્થા
    જયતુ જયતુ સમ્યક્ સર્વ-સમ્પત્કરી શ્રીઃ ॥ ૧૫॥

જયતુ જયતુ દેવી દેવસઙ્ઘાભિપૂજ્યા
    જયતુ જયતુ ભદ્રા ભાર્ગવી ભાગ્યરૂપા ।
જયતુ જયતુ નિત્યા નિર્મલજ્ઞાનવેદ્યા
    જયતુ જયતુ સત્યા સર્વભૂતાન્તરસ્થા ॥ ૧૬॥

જયતુ જયતુ રમ્યા રત્નગર્ભાન્તરસ્થા
 જયતુ જયતુ શુદ્ધા શુદ્ધજામ્બૂનદાભા ।
જયતુ જયતુ કાન્તા કાન્તિમદ્ભાસિતાઙ્ગી
 જયતુ જયતુ શાન્તા શીઘ્રમાગચ્છ સૌમ્યે ॥ ૧૭॥

યસ્યાઃ કલાયાઃ કમલોદ્ભવાદ્યા રુદ્રાશ્ચ શક્રપ્રમુખાશ્ચ દેવાઃ ।
જીવન્તિ સર્વેઽપિ સશક્તયસ્તે પ્રભુત્વમાપ્તાઃ પરમાયુષસ્તે ॥ ૧૮॥

॥ મુખબીજમ્ ॥ ૐ-હ્રાં-હ્રીં-અં-આં-યં-દું-લં-વમ્ ॥

લિલેખ નિટિલે વિધિર્મમ લિપિં વિસૃજ્યાન્તરં
 ત્વયા વિલિખિતવ્યમેતદિતિ તત્ફલપ્રાપ્તયે ।
તદન્તિકફલસ્ફુટં કમલવાસિનિ શ્રીરિમાં
 સમર્પય સ્વમુદ્રિકાં સકલભાગ્યસંસૂચિકામ્ ॥ ૧૯॥

॥ પાદબીજમ્ ॥ ૐ-અં-આં-ઈં-એં-ઐં-કં-લં-રં ॥

કલયા તે યથા દેવિ જીવન્તિ સચરાચરાઃ ।
તથા સમ્પત્કરી લક્ષ્મિ સર્વદા સમ્પ્રસીદ મે ॥ ૨૦॥

યથા વિષ્ણુર્ધ્રુવં નિત્યં સ્વકલાં સંન્યવેશયત્ ।
તથૈવ સ્વકલાં લક્ષ્મિ મયિ સમ્યક્ સમર્પય ॥ ૨૧॥

સર્વસૌખ્યપ્રદે દેવિ ભક્તાનામભયપ્રદે ।
અચલાં કુરુ યત્નેન કલાં મયિ નિવેશિતામ્ ॥ ૨૨॥

મુદાસ્તાં મત્ફાલે પરમપદલક્ષ્મીઃ સ્ફુટકલા
 સદા વૈકુણ્ઠશ્રીર્નિવસતુ કલા મે નયનયોઃ ।
વસેત્સત્યે લોકે મમ વચસિ લક્ષ્મીર્વરકલા
 શ્રિયશ્વેતદ્વીપે નિવસતુ કલા મે સ્વ-કરયોઃ ॥ ૨૩॥

॥ નેત્રબીજમ્ ॥ ૐ-ઘ્રાં-ઘ્રીં-ઘ્રેં-ઘ્રૈં-ઘ્રોં-ઘ્રૌં-ઘ્રં-ઘ્રઃ ॥

તાવન્નિત્યં મમાઙ્ગેષુ ક્ષીરાબ્ધૌ શ્રીકલા વસેત્ ।
સૂર્યાચન્દ્રમસૌ યાવદ્યાવલ્લક્ષ્મીપતિઃ શ્રિયૌ ॥ ૨૪॥

સર્વમઙ્ગલસમ્પૂર્ણા સર્વૈશ્વર્યસમન્વિતા ।
આદ્યાઽઽદિશ્રીર્મહાલક્ષ્મીસ્ત્વત્કલા મયિ તિષ્ઠતુ ॥ ૨૫॥

અજ્ઞાનતિમિરં હન્તું શુદ્ધજ્ઞાનપ્રકાશિકા ।

સર્વૈશ્વર્યપ્રદા મેઽસ્તુ ત્વત્કલા મયિ સંસ્થિતા ॥ ૨૬॥

અલક્ષ્મીં હરતુ ક્ષિપ્રં તમઃ સૂર્યપ્રભા યથા ।
વિતનોતુ મમ શ્રેયસ્ત્વત્કલા મયિ સંસ્થિતા ॥ ૨૭॥

ઐશ્વર્યમઙ્ગલોત્પત્તિઃ ત્વત્કલાયાં નિધીયતે ।
મયિ તસ્માત્કૃતાર્થોઽસ્મિ પાત્રમસ્મિ સ્થિતેસ્તવ ॥ ૨૮॥

ભવદાવેશભાગ્યાર્હો ભાગ્યવાનસ્મિ ભાર્ગવિ ।
ત્વત્પ્રસાદાત્પવિત્રોઽહં લોકમાતર્નમોઽસ્તુ તે ॥ ૨૯॥

પુનાસિ માં ત્વત્કલયૈવ યસ્માત્
　અતસ્સમાગચ્છ મમાગ્રતસ્ત્વમ્ ।
પરં પદં શ્રીર્ભવ સુપ્રસન્ના
　મય્યચ્યુતેન પ્રવિશાદિલક્ષ્મીઃ ॥ ૩૦॥

શ્રીવૈકુણ્ઠસ્થિતે લક્ષ્મિ સમાગચ્છ મમાગ્રતઃ ।
નારાયણેન સહ માં કૃપાદૃષ્ટ્યાઽવલોકય ॥ ૩૧॥

સત્યલોકસ્થિતે લક્ષ્મિ ત્વં મમાગચ્છ સન્નિધિમ્ ।
વાસુદેવેન સહિતા પ્રસીદ વરદા ભવ ॥ ૩૨॥

શ્વેતદ્વીપસ્થિતે લક્ષ્મિ શીઘ્રમાગચ્છ સુવ્રતે ।
વિષ્ણુના સહિતા દેવિ જગન્માતઃ પ્રસીદ મે ॥ ૩૩॥

ક્ષીરામ્બુધિસ્થિતે લક્ષ્મિ સમાગચ્છ સમાધવે ।
ત્વત્કૃપાદૃષ્ટિસુધયા સતતં માં વિલોકય ॥ ૩૪॥

રત્નગર્ભસ્થિતે લક્ષ્મિ પરિપૂર્ણહિરણ્મયિ ।
સમાગચ્છ સમાગચ્છ સ્થિત્વાઽઽશુ પુરતો મમ ॥ ૩૫॥

સ્થિરા ભવ મહાલક્ષ્મિ નિશ્ચલા ભવ નિર્મલે ।
પ્રસન્નકમલે દેવિ પ્રસન્નહૃદયા ભવ ॥ ૩૬॥

શ્રીધરે શ્રીમહાલક્ષ્મિ ત્વદન્તઃસ્થં મહાનિધિમ્ ।
શીઘ્રમુદ્ધૃત્ય પુરતઃ પ્રદર્શય સમર્પય ॥ ૩૭॥

વસુન્ધરે શ્રીવસુધે વસુદોગ્ધ્રિ કૃપામયિ ।
ત્વત્કુક્ષિગતસર્વસ્વં શીઘ્રં મે સમ્પ્રદર્શય ॥ ૩૮॥

વિષ્ણુપ્રિયે રત્નગર્ભે સમસ્તફલદે શિવે ।

ત્વદ્ગર્ભગતહેમાદીન્ સમ્પ્રદર્શય દર્શય ॥ ૩૯॥

રસાતલગતે લક્ષ્મિ શીઘ્રમાગચ્છ મે પુરઃ ।
ન જાને પરમં રૂપં માતર્મે સમ્પ્રદર્શય ॥ ૪૦॥

આવિર્ભવ મનોવેગાત્  શીઘ્રમાગચ્છ મે પુરઃ ।
મા વત્સ ભૈરિહેત્યુક્ત્વા કામં ગૌરિવ રક્ષ મામ્ ॥ ૪૧॥

દેવિ શીઘ્રં સમાગચ્છ ધરણીગર્ભસંસ્થિતે ।
માતસ્ત્વદ્ભૃત્યભૃત્યોઽહં મૃગયે ત્વાં કુતૂહલાત્ ॥ ૪૨॥

ઉત્તિષ્ઠ જાગૃહિ ત્વં મે સમુત્તિષ્ઠ સુજાગૃહિ ।
અક્ષયાન્ હેમકલશાન્ સુવર્ણેન સુપૂરિતાન્ ॥ ૪૩॥

નિક્ષેપાન્મે સમાકૃષ્ય સમુદ્ધૃત્ય મમાગ્રતઃ ।
સમુન્નતાનના ભૂત્વા સમ્યગ્ધેહિ ધરાતલાત્ ॥ ૪૪॥

મત્સન્નિધિં સમાગચ્છ મદાહિતકૃપારસાત્ ।
પ્રસીદ શ્રેયસાં દોગ્ધ્રિ લક્ષ્મિ મે નયનાગ્રતઃ ॥ ૪૫॥

અત્રોપવિશ્ય લક્ષ્મિ ત્વં સ્થિરા ભવ હિરણ્મયી ।
સુસ્થિરા ભવ સમ્પ્રીત્યા પ્રસન્ના વરદા ભવ ॥ ૪૬॥

આનીતાંસ્તુ ત્વયા દેવિ નિધીન્મે સમ્પ્રદર્શય ।
અદ્ય ક્ષણેન સહસા દત્ત્વા સંરક્ષ માં સદા ॥ ૪૭॥

મયિ તિષ્ઠ તથા નિત્યં યથેન્દ્રાદિષુ તિષ્ઠસિ ।
અભયં કુરુ મે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ॥ ૪૮॥

સમાગચ્છ મહાલક્ષ્મિ શુદ્ધજામ્બૂનદ-સ્થિતે ।
પ્રસીદ પુરતઃ સ્થિત્વા પ્રણતં માં વિલોકય ॥ ૪૯॥

લક્ષ્મીર્ભુવં ગતા ભાસિ યત્ર યત્ર હિરણ્મયી ।
તત્ર તત્ર સ્થિતા ત્વં મે તવ રૂપં પ્રદર્શય ॥ ૫૦॥

ક્રીડન્તી  બહુધા ભૂમૌ પરિપૂર્ણકૃપા મયિ ।
મમ મૂર્ધનિ તે હસ્તમવિલમ્બિતમર્પય ॥ ૫૧॥

ફલદ્ભાગ્યોદયે લક્ષ્મિ સમસ્તપુરવાસિનિ ।
પ્રસીદ મે મહાલક્ષ્મિ પરિપૂર્ણમનોરથે ॥ ૫૨॥

અયોધ્યાદિષુ સર્વેષુ નગરેષુ સમાસ્થિતે ।
વિભવૈર્વિવિધૈર્યુક્તૈઃ સમાગચ્છ મુદાન્વિતે ॥ ૫૩॥

સમાગચ્છ સમાગચ્છ મમાગ્રે ભવ સુસ્થિરા ।
કરુણારસનિષ્યન્દનેત્રદ્વયવિશાલિનિ ॥ ૫૪॥

સન્નિધત્સ્વ મહાલક્ષ્મિ ત્વત્પાણિં મમ મસ્તકે ।
કરુણાસુધયા માં ત્વમભિષિચ્ય સ્થિરં કુરુ ॥ ૫૫॥

સર્વરાજગૃહે લક્ષ્મિ સમાગચ્છ બલાન્વિતે ।
સ્થિત્વાઽઽશુ પુરતો મેઽદ્ય પ્રસાદેનાભયં કુરુ ॥ ૫૬॥

સાદરં મસ્તકે હસ્તં મમ ત્વં કૃપયાઽર્પય ।
સર્વરાજસ્થિતે લક્ષ્મિ ત્વત્કલા મયિ તિષ્ઠતુ ॥ ૫૭॥

આદ્યાદિ શ્રીર્મહાલક્ષ્મિ વિષ્ણુવામાઙ્કસંસ્થિતે ।
પ્રત્યક્ષં કુરુ મે રૂપં રક્ષ માં શરણાગતમ્ ॥ ૫૮॥

પ્રસીદ મે મહાલક્ષ્મિ સુપ્રસીદ મહાશિવે ।
અચલા ભવ સુપ્રીતા સુસ્થિરા ભવ મદ્ગૃહે ॥ ૫૯॥

યાવત્તિષ્ઠન્તિ વેદાશ્ચ યાવચ્ચન્દ્ર-દિવાકરૌ ।
યાવદ્વિષ્ણુશ્ચ યાવત્ત્વં તાવત્કુરુ કૃપાં મયિ ॥ ૬૦॥

ચાન્દ્રી કલા યથા શુક્લે વર્ધતે સા દિને દિને ।
તથા દયા તે મય્યેવ વર્ધતામભિવર્ધતામ્ ॥ ૬૧॥

યથા વૈકુણ્ઠનગરે યથા વૈ ક્ષીરસાગરે ।
તથા મદ્ભવને તિષ્ઠ સ્થિરં શ્રીવિષ્ણુના સહ ॥ ૬૨॥

યોગિનાં હૃદયે નિત્યં યથા તિષ્ઠસિ વિષ્ણુના ।
તથા મદ્ભવને તિષ્ઠ સ્થિરં શ્રીવિષ્ણુના સહ ॥ ૬૩॥

નારાયણસ્ય હૃદયે ભવતી યથાઽઽસ્તે
    નારાયણોઽપિ તવ હૃત્કમલે યથાઽઽસ્તે ।
નારાયણસ્ત્વમપિ નિત્યવિભૂ તથૈવ
    તૌ તિષ્ઠતાં હૃદિ મમાપિ દયાન્વિતૌ શ્રીઃ ॥ ૬૪॥

વિજ્ઞાનવૃદ્ધિં હૃદયે કુરુ શ્રીઃ સૌભાગ્યવૃદ્ધિં કુરુ મે ગૃહે શ્રીઃ ।
દયાસુવૃદ્ધિં કુરુતાં મયિ શ્રીઃ સુવર્ણવૃદ્ધિં કુરુ મે ગૃહે શ્રીઃ ॥ ૬૫॥

ન માં ત્યજેથાઃ શ્રિતકલ્પવલ્લિ સદ્ભક્તિ-ચિન્તામણિ-કામધેનો ।
ન માં ત્યજેથા ભવ સુપ્રસન્ને ગૃહે કલત્રેષુ ચ પુત્રવર્ગે ॥ ૬૬॥

॥ કુક્ષિબીજમ્ ॥ ૐ-અં-આં-ઈં-એં-ઐં ॥

આદ્યાદિમાયે ત્વમજાણ્ડબીજં ત્વમેવ સાકાર-નિરાકૃતી ત્વમ્ ।
ત્વયા ધૃતાશ્ચાબ્જભવાણ્ડસઙ્ઘાશ્ચિત્રં ચરિત્રં તવ દેવિ વિષ્ણોઃ ॥ ૬૭॥

બ્રહ્મરુદ્રાદયો દેવા વેદાશ્ચાપિ ન શક્નુયુઃ ।
મહિમાનં તવ સ્તોતું મન્દોઽહં શક્નુયાં કથમ્ ॥ ૬૮॥

અમ્બ ત્વદ્વત્સવાક્યાનિ સૂક્તાસૂક્તાનિ યાનિ ચ ।
તાનિ સ્વીકુરુ સર્વજ્ઞે દયાલુત્વેન સાદરમ્ ॥ ૬૯॥

ભવન્તં શરણં ગત્વા કૃતાર્થાઃ સ્યુઃ પુરાતનાઃ ।
ઇતિ સઞ્ચિન્ત્ય મનસા ત્વામહં શરણં વ્રજે ॥ ૭૦॥

અનન્તા નિત્યસુખિનઃ ત્વદ્ભક્તાસ્ત્વત્પરાયણાઃ ।
ઇતિ વેદપ્રમાણાદ્ધિ દેવિ ત્વાં શરણં વ્રજે ॥ ૭૧॥

તવ પ્રતિજ્ઞા મદ્ભક્તા ન નશ્યન્તીત્યપિ ક્વચિત્ ।
ઇતિ સઞ્ચિન્ત્ય સઞ્ચિન્ત્ય પ્રાણાન્ સન્ધારયામ્યહમ્ ॥ ૭૨॥

ત્વદધીનસ્ત્વહં માતઃ ત્વત્કૃપા મયિ વિદ્યતે ।
યાવત્સમ્પૂર્ણકામઃ સ્યાં તાવદ્દેહિ દયાનિધે ॥ ૭૩॥

ક્ષણમાત્રં ન શક્નોમિ જીવિતું ત્વત્કૃપાં વિના ।
ન હિ જીવન્તિ  જલજા જલં ત્યક્ત્વા જલાશ્રયાઃ ॥ ૭૪॥

યથા હિ પુત્રવાત્સલ્યાત્ જનની પ્રસ્નુતસ્તની ।
વત્સં ત્વરિતમાગત્ય સમ્પ્રીણયતિ વત્સલા ॥ ૭૫॥

યદિ સ્યાં તવ પુત્રોઽહં માતા ત્વં યદિ મામકી ।
દયાપયોધર-સ્તન્ય-સુધાભિરભિષિઞ્ચ મામ્ ॥ ૭૬॥

મૃગ્યો ન ગુણલેશોઽપિ મયિ દોષૈક-મન્દિરે ।
પાંસૂનાં વૃષ્ટિબિન્દૂનાં દોષાણાં ચ ન મે મતિઃ ॥ ૭૭॥

પાપિનામહમેકાગ્રો દયાલૂનાં ત્વમગ્રણીઃ ।
દયનીયો મદન્યોઽસ્તિ તવ કોઽત્ર જગત્ત્રયે ॥ ૭૮॥

વિધિનાહં ન સૃષ્ટશ્ચેત્ ન સ્યાત્તવ દયાલુતા ।
આમયો વા ન સૃષ્ટશ્ચેદૌષધસ્ય વૃથોદયઃ ॥ ૭૯॥

કૃપા મદગ્રજા કિં તે અહં કિં વા તદગ્રજઃ ।
વિચાર્ય દેહિ મે વિત્તં તવ દેવિ દયાનિધે ॥ ૮૦॥

માતા પિતા ત્વં ગુરુઃ સદ્ગતિઃ શ્રીઃ
 ત્વમેવ સઞ્જીવનહેતુભૂતા ।
અન્યં ન મન્યે જગદેકનાથે
 ત્વમેવ સર્વં મમ દેવિ સત્યમ્ ॥ ૮૧॥

॥ હૃદય બીજમ્ ॥

ૐ-ઘ્રાં-ઘ્રીં-ઘ્રૂં-ઘ્રૈં-ઘ્રૌં-ઘ્રઃ-હું ફટ્ કુરુ કુરુ સ્વાહા ॥

આદ્યાદિલક્ષ્મીર્ભવ સુપ્રસન્ના વિશુદ્ધવિજ્ઞાનસુખૈકદોગ્ધ્રિ ।
અજ્ઞાનહન્ત્રી ત્રિગુણાતિરિક્તા પ્રજ્ઞાનનેત્રી ભવ સુપ્રસન્ના ॥ ૮૨॥

અશેષવાગ્જાડ્ય-મલાપહન્ત્રી નવં નવં સુષ્ટુ સુવાક્યદાયિની ।
મમૈવ જિહ્વાગ્રસુરઙ્ગવર્તિની ભવ પ્રસન્ના વદને ચ મે શ્રીઃ ॥ ૮૩॥

સમસ્તસમ્પત્સુ વિરાજમાના સમસ્તતેજસ્સુ વિભાસમાના ।
વિષ્ણુપ્રિયે ત્વં ભવ દીપ્યમાના વાગ્દેવતા મે નયને પ્રસન્ના ॥ ૮૪॥

સર્વપ્રદર્શે સકલાર્થદે ત્વં પ્રભાસુલાવણ્યદયાપ્રદોગ્ધ્રિ ।
સુવર્ણદે ત્વં સુમુખી ભવ શ્રીર્હિરણ્મયી મે નયને પ્રસન્ના ॥ ૮૫॥

સર્વાર્થદા સર્વજગત્પ્રસૂતિઃ સર્વેશ્વરી સર્વભયાપહન્ત્રી ।
સર્વોન્નતા ત્વં સુમુખી ચ નઃ શ્રીર્હિરણ્મયી મે ભવ સુપ્રસન્ના ॥ ૮૬॥

સમસ્ત-વિઘ્નૌઘ-વિનાશકારિણી સમસ્ત-ભક્તોદ્ધરણે વિચક્ષણા ।
અનન્તસમ્મોદ-સુખપ્રદાયિની હિરણ્મયી મે નયને પ્રસન્ના ॥ ૮૭॥

દેવિ પ્રસીદ દયનીયતમાય મહ્યં
 દેવાધિનાથ-ભવ-દેવગણાભિવન્દ્યે ।
માતસ્તથૈવ ભવ સન્નિહિતા દૃશોર્મે
 પત્યા સમં મમ મુખે ભવ સુપ્રસન્ના ॥ ૮૮॥

મા વત્સ ભૈરભયદાનકરોઽર્પિતસ્તે
 મૌલૌ મમેતિ મયિ દીનદયાનુકમ્પે ।

માતઃ સમર્પય મુદા કરુણાકટાક્ષં
    માઙ્ગલ્યબીજમિહ નઃ સૃજ જન્મ માતઃ ॥ ૮૯॥

॥ કણ્ઠબીજમ્ ॥ ૐ-શ્રાં-શ્રીં-શ્રૂં-શ્રૈં-શ્રૌં-શ્રં-શ્રાઃ ॥

કટાક્ષ ઇહ કામધુક્ તવ મનસ્તુ ચિન્તામણિઃ
    કરઃ સુરતરુઃ સદા નવનિધિસ્ત્વમેવેન્દિરે ।
ભવેત્તવ દયારસો મમ રસાયનં ચાન્વહં
    મુખં તવ કલાનિધિર્વિવિધ-વાઞ્છિતાર્થપ્રદમ્ ॥ ૯૦॥

યથા રસસ્પર્શનતોઽયસોઽપિ સુવર્ણતા સ્યાત્કમલે તથા તે ।
કટાક્ષસંસ્પર્શનતો જનાનામમઙ્ગલાનામપિ મઙ્ગલત્વમ્ ॥ ૯૧॥

દેહીતિ નાસ્તીતિ વચઃ પ્રવેશાદ્ ભીતો રમે ત્વાં શરણં પ્રપદ્યે ।
અતઃ સદાસ્મિન્નભયપ્રદા ત્વં સહૈવ પત્યા મયિ સન્નિધેહિ ॥ ૯૨॥

કલ્પદ્રુમેણ મણિના સહિતા સુરમ્યા
    શ્રીસ્તે કલા મયિ રસેન રસાયનેન ।
આસ્તામતો મમ ચ દૃક્કરપાણિપાદ-
    સ્પૃષ્ટ્યાઃ સુવર્ણવપુષઃ સ્થિરજઙ્ગમાઃ સ્યુઃ ॥ ૯૩॥

આદ્યાદિવિષ્ણોઃ સ્થિરધર્મપત્ની ત્વમેવ પત્યા મમ સન્નિધેહિ ।
આદ્યાદિલક્ષ્મિ ત્વદનુગ્રહેણ પદે પદે મે નિધિદર્શનં સ્યાત્ ॥ ૯૪॥

આદ્યાદિલક્ષ્મીહૃદયં પઠેદ્યઃ સ રાજ્યલક્ષ્મીમચલાં તનોતિ ।
મહાદરિદ્રોઽપિ ભવેદ્ધનાઢ્યઃ તદન્વયે શ્રીઃ સ્થિરતાં પ્રયાતિ ॥ ૯૫॥

યસ્ય સ્મરણમાત્રેણ તુષ્ટા સ્યાદ્વિષ્ણુવલ્લભા ।
તસ્યાભીષ્ટં દદત્યાશુ તં પાલયતિ પુત્રવત્ ॥ ૯૬॥

ઇદં રહસ્યં હૃદયં સર્વકામફલપ્રદમ્ ।
જપઃ પઞ્ચસહસ્રં તુ પુરશ્ચરણમુચ્યતે ॥ ૯૭॥

ત્રિકાલમેકકાલં વા નરો ભક્તિસમન્વિતઃ ।
યઃ પઠેત્ શ૰ૃણુયાદ્વાપિ સ યાતિ પરમાં શ્રિયમ્ ॥ ૯૮॥

મહાલક્ષ્મીં સમુદ્દિશ્ય નિશિ ભાર્ગવવાસરે ।
ઇદં શ્રીહૃદયં જપ્ત્વા પઞ્ચવારં ધની ભવેત્ ॥ ૯૯॥

અનેન હૃદયેનાન્નં ગર્ભિણ્યા અભિમન્ત્રિતમ્ ।

દદાતિ તત્કુલે પુત્રો જાયતે શ્રીપતિઃ સ્વયમ્ ॥ ૧૦૦॥

નરેણાપ્યથવા નાર્યા લક્ષ્મીહૃદયમન્ત્રિતે ।
જલે પીતે ચ તદ્વંશે મન્દભાગ્યો ન જાયતે ॥ ૧૦૧॥

ય આશ્વયુઙ્માસિ ચ શુક્લપક્ષે રમોત્સવે સન્નિહિતે ચ ભક્ત્યા ।
પઠેત્તથૈકોત્તરવારવૃદ્ધ્યા લભેત્સ સૌવર્ણમયીં સુવૃષ્ટિમ્ ॥ ૧૦૨॥

ય એકભક્ત્યાઽન્વહમેકવર્ષં વિશુદ્ધધીઃ સપ્તતિવારજાપી ।
સ મન્દભાગ્યોઽપિ રમાકટાક્ષાત્ ભવેત્સહસ્રાક્ષશતાધિકશ્રીઃ ॥ ૧૦૩॥

શ્રીશાંઘ્રિભક્તિં હરિદાસદાસ્યં પ્રપન્નમન્ત્રાર્થદૃઢૈકનિષ્ઠામ્ ।
ગુરોઃ સ્મૃતિં નિર્મલબોધબુદ્ધિં પ્રદેહિ માતઃ પરમં પદં શ્રીઃ ॥ ૧૦૪॥

પૃથ્વીપતિત્વં પુરુષોત્તમત્વં વિભૂતિવાસં વિવિધાર્થસિદ્ધિમ્ ।
સમ્પૂર્ણકીર્તિં બહુવર્ષભોગં પ્રદેહિ મે દેવિ પુનઃપુનસ્ત્વમ્ ॥ ૧૦૫॥

વાદાર્થસિદ્ધિં બહુલોકવશ્યં વયઃસ્થિરત્વં લલનાસુ ભોગમ્ ।
પૌત્રાદિલબ્ધિં સકલાર્થસિદ્ધિં પ્રદેહિ મે ભાર્ગવિ જન્મજન્મનિ ॥ ૧૦૬॥

સુવર્ણવૃદ્ધિં કુરુ મે ગૃહે શ્રીઃ વિભૂતિવૃદ્ધિં કુરૂ મે ગૃહે શ્રીઃ ।
કલ્યાણવૃદ્ધિં કુરુ મે ગૃહે શ્રીઃ વિભૂતિવૃદ્ધિં કુરુ મે ગૃહે શ્રીઃ ॥ ૧૦૭॥

॥ શિરો બીજમ્ ॥ ૐ-યં-હં-કં-લં- વં-શ્રીમ્ ॥

ધ્યાયેલ્લક્ષ્મીં પ્રહસિતમુખીં કોટિબાલાર્કભાસાં
    વિદ્યુદ્વર્ણામ્બરવરધરાં ભૂષણાઢ્યાં સુશોભામ્ ।
બીજાપૂરં સરસિજયુગં બિભ્રતીં સ્વર્ણપાત્રં
    ભર્ત્રાયુક્તાં મુહુરભયદાં મહ્યમપ્યચ્યુતશ્રીઃ ॥ ૧૦૮॥

॥ ઇતિ શ્રીઅથર્વણરહસ્યે લક્ષ્મીહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

This should be chanted together with Narayanahridayastotram for greater benefits.

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com,

Proofreading and commentary by N.Balasubramanian

Proofread by PSA Easwaran

*Shri Lakshmi Hridaya Stotram*

pdf was typeset on March 5, 2023

Please send corrections to *sanskrit@cheerful.com*